दुन्दुहो जटिली भीमा द्विजिह्वः पृथिवी सती।
कोरगिरिः क्षमा कान्तिर्नाभिः स्वाती च
लोचनम्॥"
इति नानातन्त्रशास्त्रम्॥
(पद्यादौ अस्य प्रथमोपन्यासे फलं शोभा।
यदुक्तं वृत्तरत्नाकरटीकायाम्।
"डः शोभां ढो विशोभां भ्रमणमथ ण यस्तस्तु
खं यस्तु युद्धम्॥")

डः, पुं, (डयते उड्डीयते भक्तानां हृदयाकाशे
यः। डी+डाहुलकात् डः।) शिवः।
(डीयते आकाशमार्गे नभोगुणत्वादिति। डी
+डः।) शब्दः। त्रासः। इत्येकाक्षरकोषः॥
वाडवाग्निः। इति मेदिनी। डे, १॥

डङ्गरी, स्त्री, (डं अरोचकादिजनितत्रासं
गिरति नाशयतीति। गॄ+अच्। निपातनात्
सुमागमः। ततो ङीष्।) फलविशेषः। तत्-
पर्य्यायः। डाङ्गरी २ दीर्घर्व्वारुः ३ दङ्करी ४
डङ्गारी ५ नागशुण्डी ६ राजदन्तफला ७।
अस्या गुणाः। शीतलत्वम्। रुचिकारित्वम्।
दाहपित्तास्रदोषशोषात्मन्नरोधनाशित्वम्।
तर्पणत्वम्। गौल्यत्वञ्च। इति राजनिर्घण्टः॥

डङ्गारी, स्त्री, (डङ्गरी पृषोदरादित्वादात्वम्।)
डङ्गरीफलम्। इति राजनिर्घण्टः॥

डप, इ क ङ ञ संहतौ। इति कविकल्पद्रुमः॥
(चुरां-आत्मं उभं च-सकं-सेट्।) महर्न्त्य-
वर्गतृतीयादिः। इ क ङ, डम्पयते। ञ, डम्प-
यति डम्पयते। अयमात्मनेपदीत्यन्ये। संहती
राशीकरणम्। इति दुर्गादासः॥

डप, क ङ ञ संहतौ। इति कविकल्पद्रुमः॥
(चुरां-आत्मं-उभं च-सकं सेट्।) महर्न्त्यवर्ग-
तृतीयादिः। क ङ, डापयते। ञ, डापयति
डापयते। पुनःपाठान्निदनुबन्धः। अयं आत्मने-
पदीत्यन्ये। संहती राशीकरणम्। इति दुर्गा-
दासः॥

डब, इ क नोदे। इति कविकल्पद्रुमः॥ (चुरां-
परं-सकं-सेट्।) महर्न्त्यवर्गतृतीयादिः। इ क,
डम्बयति। नोदः प्रेरणम्। इति दुर्गादासः॥

डभ, इ क ञ सङ्घे। इति कविकल्पद्रुमः॥ (चुरां-
उभं-अकं-सेट।) महर्न्त्यवर्गतृतीयादिः। इ क,
डम्भयति डम्भयते। अयमात्मनेपदीति केचित्।
सङ्घो राशीकरणम्। इति दुर्गादासः॥

डमः, पुं, (डं नीचयोनित्वात् भीतिं मातीति। मा
+कः।) वर्णसङ्करजातिविशेषः। डोम इति
भाषा। स चाण्डाल्यां लेटात् जातः। इति
ब्रह्मवैवर्त्तपुराणम्॥

डमरं, क्ली, (मृ+भावे अप्। मरं पलायनं
धातूनामनेकार्थत्वात्। डेन त्रासेन मरम्।)
भीत्यापलायनम्। तत्पर्य्यायः। शृगालिका २
विद्रवः ३ डिम्बः ४। इति हारावली॥६६॥

डमरः, पुं, (डेन भयेन मरो मृतिरिव अत्र।)
परचक्रादिभयम्। अस्त्रकलहः। इत्यमर-
टीकायां स्वामी। तत्पर्य्यायः। डिम्भः २
विप्लवः ३। इत्यमरः।३।२।१४॥ डिम्बः ४
विम्बः ५ डामरः ६। इति भरतः॥ (यथाह
गर्गः।
"तक्षत्रयोऽस्थिकेतुः स तु रूक्षः क्षुद्भयावहः
प्रोक्तः।
स्निग्धस्ताडक् प्राच्यां शाखाख्यो डमर-
मरकाय॥")

डमरुः, पुं, (डमित्यव्यक्तशब्दं ऋच्छतीति। ऋ
+"मृगय्वादयश्च।" उणां १।३८। इति कु-
प्रत्ययेन निपातनात् साधुः।) वाद्यभेदः।
इत्यमरः।१।७।८॥ कपालियोगिवाद्यम्।
इति भरतः॥ क्षीणमध्यो गुटिकाद्वयालम्बितः।
इति सारसुन्दरी॥ (यथा, योगसारे २ परि-
च्छेदे।
"वादयन् डमरुं योगी यत्र कुत्राश्रमे स्थितः॥")
चमत्कारः। इति त्रिकाण्डशेषः॥

डयनं, क्ली, (डीयते आकाशमार्गे गम्यतेऽनेनेति।
डी+करणे ल्युट्।) कर्णीरथः। (डी ङ नभो-
गतौ+भावे ल्युट्।) नभोगतिः। इति हेम-
चन्द्रः।४।३८४॥

डल्लकं, क्ली, वंशादिनिर्म्मितपात्रम्। डाला इति
भाषा। यथा,—
"त्रिशतञ्च शताधिकं डल्लकं वस्त्रसंयुतम्।
सभोज्यं सोपवीतञ्च सोपहारं मनोहरम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥

डवित्थः, पुं, काष्ठमयमृगः। यथा,—
"डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो मृगः॥"
इति सुपद्मव्याकरणे विभक्तिपादः॥
(द्रव्यवाचिसंज्ञाशब्दविशेषः। यथा साहित्य-
दर्पणे। "द्रव्यशब्दा एकव्यक्तिवाचिनो हरि-
हरडित्थडवित्थादयः॥")

डहुः, पुं, (दहति तापयति सर्व्वशरीरमिति।
दह+मृगय्वादित्वात् कुप्रत्ययेन निपातनात्
साधुः।) वृक्षविशेषः। डेहुया इति मादार
इति च भाषा। तत्पर्य्यायः। लकुचः २
लिकुचः ३। इत्यमरः।२।४।६०॥ अस्य
गुणाः। गुरुत्वम्। विष्टम्भित्वम्। त्रिदोष-
शुक्रदुष्टिकारित्वञ्च। इति राजवल्लभः॥

डहूः, पुं, (डहुः। पृषोदरादित्वात् दीर्घः।)
डहुः। इति शब्दरत्नावली॥

डा, स्त्री, (डीयते नभोमार्गे गच्छतीति। डी
+अन्येष्वपीति डः स्त्रियां टाप्।) डाकिनी।
इति मेदिनी। डे, १॥

डाकिनी, स्त्री, (डाय भयदानाय अकति कुटिलं
व्रजतीति। अक वक्रगतौ+इनिः। ततो ङीप्।)
कालीगणविशेषः। यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे।
"सार्द्धञ्च डाकिनीनाञ्च विकटानां त्रिकोटिभिः॥"
(डाकानां समूहः। "खलादिभ्य इनिर्व्वक्तव्यः।"
४।२।५१। इत्यस्य वार्त्तिकोक्त्या इनिः।
डाकानां समूहः। इति सिद्धान्तकौमुदी॥)

डाङ्गरी, स्त्री, (डङ्गरी पृषोदरादित्वादात्वम्।)
डङ्गरीफलम्। इति राजनिर्घण्टः॥

डामरः, पुं, शिवोक्तशास्त्रविशेषः। (यथा,
काशीखण्डे।२६।७०।
"डमड्डमरुहस्ता च डामरोक्तमहाण्डका॥"
"डामरो डामरकल्पो नवाक्षरदेवीमन्त्रस्य
प्रतिपादको ग्रन्थो महाराष्ट्रे सुप्रसिद्धस्तत्रोक्तं
प्रतिपादितं मन्त्रमयं महच्छरीरं यस्याः॥"
इति तट्टीका॥) स तु षड्विधः। तेषां
नामानि श्लोकसंख्याश्च यथा। योगडामरः
२३,५३३। शिवडामरः ११,००७। दुर्गाडामरः
११,५०३। सारस्वतडामरः ८,८०५। ब्रह्म-
डामरः ७,१०५। गन्धर्व्वडामरः ६०,०६०।
इति वाराहीतन्त्रम्॥ डमरः। इत्यमर-
टीकायां भरतः॥ चमत्कारः। यथा। भूतानां
डामरश्चमत्कारोऽत्रेति भूतडामरशब्दनिर्व्व-
चने निबन्धकारः॥ (गर्व्वः। आटोपः। यथा,
गीतगोविन्दे।१२।२२।
"मम रुचिरे चिकुरे कुरु मानद! मानसज-
ध्वजचामरे।
रतिगलिते ललिते कुसुमानि शिखण्डि-
शिखण्डकडामरे॥"
कोटचक्रविशेषः। यथा, समयामृते।
"अथातः संप्रवक्ष्यामि कोटचक्रमिहाष्टधा॥"
इत्युपक्रम्य,—
"पञ्चमो गिरिकोटश्च षष्ठः कोटश्च डामरः॥"
इत्युक्तवान्॥
अस्य विशेषविवृतिः चक्रशब्दे द्रष्टव्या॥ * ॥
क्षेत्रपालविशेषः। यथा, प्रयोगसारे।
"भेदा एकोनपञ्चाशत् क्षेत्रपालस्य कीर्त्तिताः॥"
इत्युपक्रम्य,—
"टङ्कपाणिस्तथा चान्यष्ठानबन्धुश्च डामरः॥")

डालिमः, पुं, (दाडिम्बः पृषोदरादित्वात् साधुः।)
दालिमः। इत्यमरटीकायां भरतः॥

डाहलः, पुं, त्रिपुरदेशः। इति भूरिप्रयोगः॥

डाहुकः, पुं, दात्यूहपक्षी। इति जटाधरः॥

डिङ्गरः, पुं, डङ्गरः। क्षेपः। खलः। धूर्त्तः।
सेवकः। इति शब्दरत्नावली॥

डिण्डिमः, पुं, (डिण्डीति शब्दं मातीति। मा+
कः।) वाद्यप्रभेदः। इत्यमरः।१।७।८॥
डेङ्गरीति ख्यातः। इति भरतः॥ माहेश्वर-
दण्डीति ख्यातः। इति सारसुन्दरी॥ (यथा,
महाभारते।७।१६२।४४।
"भेरीश्चाभ्यहनन् हृष्टा डिण्डिमांश्च सहस्रशः॥"
डिण्डिम इव आकृतिरस्यास्येति। अर्श
आदित्वादच्।) कृष्णपाकफलः। इति शब्द-
चन्द्रिका॥ पानी आमला इति भाषा॥

डिण्डिरः, पुं, (हिण्डिरः पृषोदरादित्वात् हस्य
डः।) समुद्रफेनः। इति हेमचन्द्रः।४।१४३॥

डिण्डिरमोदकं, क्ली, (मोदयतीति। मुद्+ण्वुल्।
डिण्डिर इव मोदकम्।) गृञ्जनम्। इति राज-
निर्घण्टः॥

डिण्डिशः, पुं, टिण्डिशः। टेँड्श् इति भाषा॥
(यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमभागे।